## आमची इतर प्रकाशने

कोल्हापूरचे सुप्रसिद्ध संगीततज्ज्ञ ॲड. बाबुराव जोशी यांच्या CD

१. बाल संगीत : सर्वांना शास्त्रीय संगीत शिकवीणारी अभिनव योजना.
२. संगीताचा रसास्वाद : हिंदुस्तानी शास्त्रीय संगीत जाणून घेण्यासाठी एक अनोखी सप्रयोग बैठक.
३. छंद, शास्त्र आणि संगीत : छंद व वृत्त यांच्या चाली जाणून घेण्यासाठी.
4. Introducing Indian Music : Series of 8 Demonstration lectures on Indian Classical Music. Artist : Sarala Bhide, Pt. Jasraj, Pt. Laxmi Shankar, Pt. Jitendra Abhisheki.
५. तबला रियाज : तबल्याचा शास्त्रोक्त रियाज करण्यासाठी.
६. संध्या महामंत्र : दैनंदिन जीवनात संध्या करण्यासाठी
७. शुभंकरोति : शुभंकरोति, गणपती स्त्रोत्र, मारुती स्त्रोत्र, गणपती अथर्वशीर्ष, श्रीमद्‌भगवद्‌गीता अध्याय १५, श्रीरामरक्षा यांचे तंबोरा वाजवून पारंपारिक चालीत पठण.
८. श्री गणपती अथर्वशीर्ष : तंबोरा वाजवून संथ लयीत सहा वेळा केलेले पठण व फलश्रुती आणि ॐ गं गणपतये नमः या मंत्राचा सुरेल जप.
९. ॐ नमो भगवते वासुदेवाय या मंत्राचा मंद्र सप्तकातील पंचमा पासून ते तार सप्तकातील रिषभा पर्यंत सूर लावून केलेला जप.
१०. जीवनाकरीता श्रीमद्‌भगवद्‌गीता - पुस्तक.
११. अष्टांग योयातील यम आणि नियम - पुस्तक.
१२. मनाच्या श्लोकातील श्रीराम - पुस्तक.
१३. निरोगी जीवनाची सूत्रे - पुस्तक.
१४. मूर्खांची लक्षणे - पुस्तक.

## वेदान्त मार्गदर्शक

आमच्या संस्थेचे उपक्रम.

श्रीमद्‌भगवद्‌गीता प्रवचनमाला. गीता आचरण वर्ग.

संजीवनी प्राणायाम शिबिर.

शेअर बाजार मार्गदर्शन.

॥ ॐ नमो भगवते वासुदेवाय ॥



# शुभंकरोति
# श्री गणपती स्तोत्र
# श्री मारुती स्तोत्र
# श्री गणपती अथर्वशीर्ष
# श्रीमद्‌भगवद्‌गीता अध्याय १५
# श्री रामरक्षा


**सुरेल सावन प्रकाशन**

१९८०, सदाशिव पेठ,
माडीवाले वसाहत, पुणे ४११ ०३०.
९९२२०८११२०.
मूल्य : रु. २० मात्र.



nitinshripadjoshi@gmail.com
www.vedantmarg.info

॥ श्री गणेशाय नमः ॥
शुभंकरोति कल्याणम् आरोग्यम् धनसंपदा ।
शत्रुबुद्धी विनाशाय दिपोज्योति नमोस्तुते ॥१॥
दिव्या दिव्या दिपोत्कार कानी कुंडल मोतीहार
दिव्याला पाहून नमस्कार ॥२॥ दिवा लावला देवा पाशी
उजेड पडला तुळशी पाशी माझा नमस्कार सर्व देवांच्या
पाया पाशी ॥३॥ तीळाचे तेल कापसाची वात दिवा
तेवो सारी रात घरातील पीडा बाहेर जाऊदे बाहेरची
लक्ष्मी घरात येऊदे घरच्या धन्याला मुला बाळांना उदंड
आयुष्य लाभू दे ॥४॥ उडाला उडाला कपि तो उडाला
समुद्र उल्लंघूनी लंकेसी गेला । लंकेसी जावोनी सुविचार
केला नमस्कार माझा तया मारुतीला ॥५॥ ज्या ज्या
स्थळी हे मन जाय माझे त्या त्या स्थळी हे निजरुप तुझे
मी ठेवीतो मस्तक ज्या ठिकाणी तेथे तुझे सद्गुरू पाय
दोन्ही ॥ जय जय रघुवीर समर्थ ॥ कूम् कूम् मंडीत
जनके विश्वामित्रासी धाडीले पत्र । ऐकूनी शिघ्र निघाले
संगे घेवोनी राम सौमित्र ॥६॥ कृष्ण म्हणे मातेला आई
मी जातो आताशी यमुनेला काही तरी दे खायाला लाडू
अथवा हातात कान्हवला ॥७॥ धर्माच्या करीता आम्हास
जगती रामानी धाडीयले । ऐसे जाणूनी राम भक्ती
करीता ऐश्वर्य हे लाभले ॥८॥ आता धर्म सख्या तुझ्या
पुढतीया नम्रत्वतेणे असे इच्छा होदसी मानसी करीतसे हा
देह तुझा असे ॥९॥ मोरया मोरया मी बाळ तान्हे तुझीच
सेवा करू काय जाणे । अन्याय माझे कोटयानूकोटी
मोरेशवरा बा तू घाल पोटी ॥१०॥ प्रारंभी विनती करू
गणपती विद्यादया सागरा अज्ञानत्व हरोनी बुद्धी मती दे
आराध्य मोरेश्वरा ॥११॥ चिंता क्लेश दरीद्र दुःख हरूनी
देशांतरा पाठवी हेरंबा गणनायका गजमुखा भक्ताबहू
तोषवी ॥१२॥ नेत्री दोन हिरे प्रकाश पसरे अत्यंत ते
साजीरे माथा शेंदूर पाझरे वरी वरी दुर्वांकुरांचे तुरे ॥१३॥
माझे चित्त हरे मनोरथ पुरे देखोनी चिंता हरे गोसावी सुत
वासुदेव कवी रे त्या मोरयाला स्मरे ॥१४॥



## श्री गणपती स्तोत्रम्।

श्री गणेशाय नमः । नारद उवाच ।
प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम्।
भक्तावासं स्मरेन्नित्यमायुः कामार्थसिद्धये॥१॥
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम्।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम्॥२॥
लम्बोदरं पंञ्चमं च षष्ठं विकटमेव च।
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम्॥३॥
नवमं भालन्द्रं च दशमं तू विनायकम्।
एकादशं गणपतिं द्वादशं तू गजाननम्॥४॥
द्वादशैतानि नामानि त्रिसंध्यं यः पठेन्नरः।
न च विघ्नभयं तस्य सर्वसिद्धीकरं प्रभो॥५॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम्।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम्॥६॥
जपेदगणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत्।
संवत्सरेण सिद्धिं च लभते नात्र संशयः॥७॥
अष्टभ्योब्राम्हणेभ्यश्च लिखित्वा यः समर्पयेत्।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः॥८॥
इति श्री नारदपुराणे संकटनाशनं नाम श्री गणपतीस्तोत्रं संपूर्णम्।।

## श्री मारुती स्तोत्र।

भीमरुपी महारुद्रा, वज्रहनुमान मारुती।
वनारी अंजनीसूता, रामदूता प्रभंजना॥१॥
महाबळी प्राणदाता, सकळां उठवी बळें।
सौख्यकारी दुःखहारी, धूर्त वैष्णव गायका॥२॥

दीनानाथा हरीरूपा, सुंदरा जगदंतरा।
पातालदेवताहंता, भव्यसिंदूरलेपना॥३॥
लोकनाथा जगन्नाथा,प्राणनाथा पुरातना।
पुण्यवंता पुण्यशीला, पावना परितोषका॥४॥
ध्वजांगें उचली बाहो, आवेशें लोटला पुढें।
काळाग्नि काळरुद्राग्नि, देखतां कांपती भयें॥५॥
ब्रह्मांडें माइलीं नेणों, आंवाळें दंतपंगती।
नेत्राग्नि चालिल्या ज्वाळा, भ्रुकुटी ताठिल्या बळें॥६॥
पुच्छ तें मुरडिलें माथां किरीटी कुंडलें बरीं।
सुवर्णकटिकांसोटी, घंटा किंकिणि नागरा॥७॥
ठकारे पर्वताऐसा, नेटका सडपातळू।
चपळांग पाहता मोठें, महाविद्युल्लतेपरी॥८॥
कोटिच्या कोटि उ-णें, झेंपावे उत्तरेकडे।
मंद्राद्रीसारिखा द्रोणू, क्रोधें उत्पाटिला बळें॥९॥
आणिला मागुती नेला, आला गेला मनोगती।
मनासी टाकिलें मागें, गतीसी तुळणा नसें॥१०॥
अणूपासोनि ब्रह्मांडायेवढा होत जातसे।
तयासी तुळणा कोठें, मेरुमांदार धाकुटे॥११॥
ब्रह्मांडाभोंवते वेढे, वज्रपुच्छें करुं शके।
तयासी तुळणा कैंची, ब्रह्मांडीं पाहतां नसे॥१२॥
आरक्त देखिलें डोळां, ग्रासिलें सूर्यमंडळा।
वाढतां वाढतां वाढे, भेदिलें शून्यमंडळा॥१३॥
धनधान्यपशुवृद्धि, पुत्रपौत्र समग्रही।
पावती रूपविद्यादि, स्तोत्रपाठेंकरूनियां॥१४॥
भूतप्रेतसमंधादि, रोगव्याधि समस्तही।
नासती तुटती चिंता, आनंदे भीमदर्शनें॥१५॥
हे धरा पंधराश्लोकी, लाभली शोभली बरी।



दृढदेहो निसंदेहो, संख्या चंद्रकलागुणें॥१६॥
रामदासी अग्रगण्यू, कपिकुळासि मंडणू।
रामरूपी अंतरात्मा, दर्शनें दोष नासती॥१७॥
इति श्रीरामदासकृतं संकटनिरसनं नाम मारुतिस्तोत्रं संपूर्णम्

## श्रीगणपती अर्थर्वशीर्षम्

ॐ नमस्तेगणपतये। त्वमेवप्रत्यक्षंतत्वमसि।
त्वमेवकेवलंकर्तासि। त्वमेवकेवलंधर्तासि। त्वमेवकेवलंहर्तासि।
त्वमेवसर्वखल्विदंब्रह्मासि।त्वंसाक्षादात्मासिनित्यं ॥१॥
ऋतं वच्मि। सत्यं वच्मि ॥२॥अवत्वंमां। अववक्तारं।
अवश्रोतारं। अवदातारं। अवधातारं। अवानूचानमवशिष्यं।
अवपश्चात्तात्। अवपुरस्तात्। अवोत्तरात्तात्। अवदक्षिणात्तात्।
अवचोर्ध्वात्तात्। अवाधरात्तात्। सर्वतोमांपाहिपाहिसमंतात्
॥३॥ त्वंवाङ्मयस्त्वंचिन्मयः। त्वमानंदमयस्त्वंब्रम्हमयः।
त्वंसच्चिदानंदाद्वितीयोसि। त्वंप्रत्यक्षं ब्रह्मासि।
त्वंज्ञानमयोविज्ञानमयोसि ॥४॥सर्वंजगदिदं त्वत्तोजायते।
सर्वंजगदिदं त्वत्तस्तिष्ठति। सर्वंजगदिदं त्वयिलयमेष्यति।
सर्वंजगदिदंत्वयि प्रत्येति। त्वंभूमिरापोनलोनिलोनभः।
त्वंचत्वारिवाक्पदानि ॥५॥ त्वंगुणत्रयातीतः। त्वंदेहत्रयातीतः।
त्वंकालत्रयातीतः। त्वंमूलाधारस्थितोसि नित्यं।
त्वंशक्तित्रयात्मकः। त्वांयोगिनोध्यायंतिनित्यं।
त्वंब्रह्मात्वंविष्णूस्त्वंरुद्रस्त्वमिंद्रस्त्वमग्निस्त्वंवायुस्त्वंसूर्यस्त्वंचंद्र
मास्त्वंब्रह्मभूर्भुवःस्वरोम्॥६॥गणादिं पुर्वमुच्चार्यवर्णादिं
तदनंतरं। अनुसवारः परतरः। अर्धेंदुलसितं। तारेणऋद्धं।
एतत्तवमनुस्वरुपं। गकारः पुर्वरुपं। अकारोमध्यमरुपं

अनुस्वारश्चांत्यरुपं।बिंदुरुत्तररुपं।नादःसंधानं।संहितासंधिः।
सैषा गणेशविद्या।गणकऋषि।निचृग्दायत्रीच्छंदः।गणपतिर्देवता।
ॐ गं गणपतये नमः॥७॥ एकदंताय विद्महे वक्रतुंडाय
धीमहि। तन्नो दंती प्रचोदयात्॥८॥
एकदंतंचतुर्हस्तं पाशमंकुशधारिणम्। रदंचवरदं
हस्तैर्बिभ्राणंमूषकध्वजंम्। रक्तंलंबोदरं शूर्पकर्णकं रक्तवाससं।
रक्तगंधानुलिप्तांगंरक्तपुष्पैःसुपूजितम्।
भक्तानुकंपिनंदेवंजगत्कारणमच्युतं। आविर्भूतंचसृष्टयादौप्रकृतेः
पुरुषात्परं। एवंध्यायति यो नित्यं सयोगीयोगीनांवरः॥९॥
नमोव्रातपतये नमो गणपतये नमः प्रमथपतये नमस्ते
अस्तुलंबोदरायैकदंतायविघ्ननाशिनेशिवसुताय
श्रीवरदमूर्तयनमोनमः॥१०॥

## श्रीमद्भगवद्गीता अध्याय १५ वा

श्रीभगवानुवाच।
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छंदासि यस्य पर्णानि यस्तं वेद स वेदवित्॥१॥
अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः।
अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके॥२॥
न रुपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा।
अश्वत्थमेनं सुविरुढमूलमसंगशस्त्रेण दृढेन छित्वा॥३॥
ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्ति प्रसृता पुराणि॥४॥
निर्मानिमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसज्ञैर्गच्छिंत्यमूढाः पदमव्ययं तत्॥५॥



न तभ्दासयते सूर्यो न शशांको न पावकः।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम॥६॥
ममैवांशो जीवलोके जीवभूतः सनातनः।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥७॥
शरिरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहित्वैतानि संयाति वायुर्गंधानिवाशयात्॥८॥
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते॥९॥
उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितम्।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः॥१०॥
यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितम्।
यतंतोऽप्यकृतात्मानो नैनं पश्यंत्यचेतसः॥११॥
यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥१२॥
गामाविश्य च भूतानि धारयाम्यहमोजसा।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥१३॥
अहं वैष्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥१४॥
सर्वस्य चाहं हदि संनिविष्टो मत्तः स्मृतिर्ज्ञानिमपोहनं च।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्॥१५॥
द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥१६॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥१७॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥१८॥

यो मामेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत॥१९॥
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ।
एतद्बुध्वा बुध्दिमान् स्यात्कृतकृत्यश्च भारत॥२०॥
॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः॥

## श्रीरामरक्षा

श्रीगणेशय नमः॥ अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य॥ बुधकौशिकऋषिः॥
श्रीसीतारामचन्द्रो देवता॥ अनुष्टुप छंदः। सीता शक्तिः। श्रीमद्हनुमान्
कीलकम्। श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः॥

॥ अथ ध्यानम् ॥

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम्।
वामाङ्कारुढसीतामुखकमलमिलल्लोचनं नीरदाभं
नानाऽलंकारदीप्तं दधतमुरुजटामण्डनं रामचन्द्रम्॥

॥ इति ध्यानम् ॥

चरितं रघुनाथस्य शतकोटिप्रविसतरम्। एकैकमक्षरं पुंसां
महापातकनाशनम्॥१॥ ध्यात्वा नीलोत्पलश्यामं रामं
राजीवलोचनम्। जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम्॥२॥
सासितुणधनुर्बाणपाणिं नक्तंचरान्तकम्। स्वलीलया
जगत्त्रातुमाविर्भूतमजं विभुम्॥३॥ रामरक्षा पठेत्प्राज्ञः पापघ्नीं
सर्वकामदाम्। शिरोमे राघवःपातु, भालंदशरथात्मजः॥४॥
कौसल्येयो दृशौ पातु, विश्वामित्राप्रियः श्रुती। घ्राणं पातु
मखत्राता, मुखं सौमित्रिवत्सलः॥५॥ जिव्हां विद्यानिधिः
पातु कण्ठं भरतवन्दितः। स्कन्धौ दिव्यायुधः पातु, भुजौ
भग्रे शकार्मुकः॥६॥ करौ सीतापतिः पातु,



हृदयं जामदग्न्यजित्। मध्यं पातु, खरध्वंसी, नाभिं
जाम्बवदाश्रयः॥७॥ सुग्रीवेशः कटी पातु, सक्थिनी
हनुमत्प्रभुः। ऊरु रघुत्तमः पातु, रक्षःकुलविनाशकृत्॥८॥
जानुनी सेतुकृत्पातु, जङ्घे दशमुखान्तकः। पादौ
विभीषणश्रीदः, पातु रामो ऽखिलं वपुः॥९॥ एतां
रामबलोपेतां रक्षां यः सुकृती पठेत्। स चिरायुः सुखी पुत्री
विजयी विनयी भवेत्॥१०॥
पातालभुतलोव्योमचारिणश्छद्मचारिणः।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः॥११॥ रामेति
रामभद्रेति रामचन्द्रेति वा स्मरन्। नरो न लिप्यते पापैर्भुक्तिं
मुक्तिं च विन्दति॥१२॥ जगज्जैत्रैकमन्त्रेण
रामनाम्नाऽभिरक्षितम्। यः कण्ठे धारयेत्तस्य करस्थाः
सर्वसिद्धयः॥१३॥ वज्रपञ्जरनामेदं यो रामकवचं स्मरेत्।
अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम्॥१४॥ आदिष्टवान्
यथा स्वप्ने रामरक्षामिमां हरः। तथालिखितवान् प्रातः प्रबुद्धो
बुधकौशिकः॥१५॥ आरामः कल्पवृक्षाणां विरामः
सकलापदाम्। अभिरामस्त्रिलोकानां रामः श्रीमान् स नः
प्रभुः॥१६॥ तरुणौ रुपसंपन्नौ सुकुमारौ महाबलौ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ॥१७॥
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ। पुत्रौ दशरथस्यैतौ
भ्रातरौ रामलक्ष्मणौ॥१८॥ शरणौसर्वसत्वानां
श्रेष्ठौसर्वधनुष्मताम्। रक्षःकुलनिहनतारौ त्रायेतां नो
रघूत्तमौ॥१९॥आत्तसज्जधनुषाविषुस्पृशावक्षायाशुगनिषङ्गसंगिनौ।
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम्॥२०॥
सन्नद्धः कवची खङ्गी चापबाणोधरो युवा।गच्छन्मनोरथोऽस्माकं
रामः पातु सलक्ष्मणः॥२१॥ रामो दाशरथिः शूरो
लक्ष्मणानुचरो बली।काकुत्स्थः पुरुषः पूर्णः कौसल्येयो

रघूत्तमः ॥२२॥ वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥२३॥ इत्येतानि
जपन्नित्यं मद्भक्तः श्रद्धयाऽन्वितः। अश्वमेधाधिकं पुण्यं
संप्राप्नोति न संशयः ॥२४॥ रामं दूर्वादलश्यामं पद्माक्षं
पीतवाससम्। स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो
नरः ॥२५॥ रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरम्।
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम्।
राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शान्तमूर्तिं।
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥२६॥
रामाय रामभद्राय रामचन्द्राय वेधसे। रघुनाथाय नाथाय
सीतायाः पतये नमः ॥२७॥ श्रीराम राम रघुनन्दन राम
राम।श्रीराम राम भरताग्रज राम राम।श्रीराम राम रणकर्कश
राम राम। श्रीराम राम शरणं भव राम राम ॥२८॥
श्रीरामचन्द्रचरणौ मनसा स्मरामि। श्रीरामचन्द्रदरणौ वचसा
गृणामि। श्रीरामचन्द्रदरणौ शिरसा नमामि।
श्रीरामचन्द्रदरणौ शरणं प्रपद्ये ॥२९॥ माता रामो मत्पिता
रामचन्द्रः। स्वामी रामो मत्सखा रामचन्द्रः।
सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं। जाने नैव जाने न
जाने ॥३०॥दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा। पुरतो
मारुतिर्यस्य तं वन्दे रघुनन्दनम् ॥३१॥ लोकाभिरामं
रणरङ्गधीरं, राजीवनेत्रं रघुवंशनाथम्। कारूण्यरूपं करुणाकरं
तं, श्रीरामचन्द्रं शरणं प्रपद्ये ॥३२॥ मनोजवं मारुततुल्यवेगं,
जितेन्द्रियं,बुद्धिमतां वरिष्ठम्। वातात्मजं वानरयूथमुख्यं,
श्रीरामदूतं शरणं प्रपद्ये ॥३३॥ कूजन्तं रामरामेति मधुरं
मधुराक्षरम्। आरुह्यकविताशाखां वन्दे
वाल्मीकीकोकिलम् ॥३४॥
आपदामपहर्तारं दातारं सर्व संपदाम्। लोकाभिरामं श्रीरामं



भूयो भूयो नमाम्यहम् ॥३५॥ भर्जनं भवबीजानामर्जनं
सुखसंपदाम्। तर्जनं यमदूतानां रामरामेति गर्जनम् ॥३६॥
रामो राजमणिः सदा विजयते रामं रमेशं भजे। रामेणाभिहता
निशाचरचमू रामाय तस्मै नमः। रामान्नास्ति परायणं परतरं
१०रामस्य दासोऽस्म्यहं। रामे चित्तलयः सदा भवतु मे भो
राम मामुद्धर ॥३७॥ राम रामेति रामेति रमे रामे मनोरमे।
सहस्त्रनामतत्तुल्यं रामनाम वरानने ॥३८॥
॥ इति श्रीबुधकौशिककविरचितं श्रीरामरक्षास्तोत्रं संपूर्णम् ॥

कराग्रे वसते लक्ष्मी। कर मध्ये सरस्वति॥
करमूले तू गोविंदम्। प्रभाते कर दर्शनम् ॥१॥
सदा सर्वदा योग तुझा घडावा
तुझे कारणी देह माझा पडावा
उपेक्षु नको गुणवंता अनंता
रघुनायका मागणे हेची आता ॥२॥
वदनी कवळ घेता नाम घ्या श्रीहरीचे
सहज हवन होते नाम घेता पुकाचे
जीवन करी जीवित्वा अन्न हे पूर्ण ब्रह्म
उदर भरण नोहे जाणिजे यज्ञकर्म ॥३॥
हर्रि दाता हर्रि भोक्ता। हर्रि अन्नम् प्रजापति॥
हर्री विप्र शरीरस्तु। भुंक्ते भोजयते हरि ॥४॥
जनी भोजनी नाम वाचे वदावे।
अती आदरे गद्य घोषे म्हणावे॥
हरि चिंतने अन्न सेवीत जावे।
तरी श्रीहरि पावीजेतो स्वभावे ॥५॥

जय जय रघुवीर समर्थ
॥ श्री कृष्णार्पणमस्तु ॥ शुभं भवतु ॥